# ASIRVADASATAKAM

BY

SRIVANCHESVARA KAVI



SRI VANI VILAS PRESS,
——SRIRANGAM.——

Re 1-00

॥ श्रीः ॥

# ॥ आशीर्वादशतकम् ॥

कल्याणं वः करोतु प्रलयघनपयोव्याप्तलुप्तप्रपञ्च-
प्राग्विन्यासप्रकारक्रमसदृशपुनःकल्पनानल्पशिल्पी ।
श्रेष्ठः सर्वामराणां मुखकमलवनीसंसरद्वेदहंसः
कंसारेर्नाभिजन्मा विधिरखिलजगद्धूरिसंसारभारः ॥ १ ॥

हस्ताब्जन्यस्तवीणाप्रगुणगुणभवत्काकलीपाकलीला-
सोदर्यश्रीककण्ठोदितकलमधुरोदारसंगीतनादा ।
श्रीभोवक्त्राब्जसौधोपरिविहृतिपरा शारदा शारदाभ्र-
श्यायादायादकाया प्रभवतु रसनावर्तिनी नर्तिनी वः ॥ २ ॥

नागादद्यामितं वो विभवमिभवरोद्धारबद्धारभव्या
भाव्या द्रागन्वटाढ्यासरुडुरुगरुडाटोपवैयर्थ्यकारी ।
चक्रेण क्रूरकर्मक्रमकरमकरध्वंसनः कंसवैरी
तत्तादृग्भक्तियुक्ताखिलजनविपदुत्तारदत्तास्थचित्तः ॥ ३ ॥

तत्तत्प्राग्भागधेयोदयसदृशनिजापाङ्गवीक्षाविशेष-
व्यापारव्यक्ततत्तज्जनविपुलधनैश्वर्यनैकप्रभेदा ।
माता पैतामही सा सकलमुनिजनोत्फुल्लहृत्पद्मसद्मा
पद्मा पद्माक्षकान्ता निवसतु भवतामिन्दिरा मन्दिरान्तः ॥४॥

अङ्के विन्यस्तपङ्केरुहनयनपदाम्भोजसंवाहलीला-
किंचित्किंचित्कराब्जद्वयचलितकणत्कङ्कणक्वाणरम्या ।
भूतानामादिभूता नदनगनगरग्रामसीमाभिरामा
सर्वं सर्वंसहा वः प्रथयतु विभवं कोमलश्यामलङ्गी ॥ ५ ॥

अच्छस्वीयाग्रपुत्रप्रतिहतसलिलोद्गच्छदुद्वेलखेल-
त्कल्लोलाक्रान्तघोरप्रलयजलनिधिभ्रान्तसंचारलीलः ।
हत्वा दैत्याधिपं द्रागपहृतनिगमं प्रोद्धृताशेषवेदो
मीनाधीशः स मीनात्वगणितमहिमा हन्त दीनां दशां वः ॥

योक्त्रव्याकृष्टपृष्ठभ्रमणविघटितस्कन्धमन्थानशैल-
ग्रावाप्रोत्सृष्टकण्डूशमनभवसुखप्राप्तनिस्तन्द्रनिद्रः ।
उद्यन्निःश्वासवातोच्चलितघनपयोबुद्बुदोद्भूतसिन्धुः
स श्रीमानादिकूर्मो निरुपममिह नः शर्म निर्मातुमीष्टाम् ॥

यत्कायस्तब्धरोमाश्वलगतमखिलं वारिधीनां कदम्बं
प्रातर्घासाग्रलग्नप्रतनुहिमजलस्तोकशङ्कां चकार ।

शुभ्रादभ्राभ्रपृष्ठस्फुरितशशिकलाविभ्रमस्पष्टदंष्ट्रा-
मुस्ताखण्डायमानक्षितिरवतु स वः श्रीवराहः पुराणः ॥ ८ ॥

याच्ञादैन्योक्तिलज्जावशत इव तनौ ह्रस्वतामश्नुवानो
नम्रीभूतश्च शत्रोर्जगति बलितया वैतसीं वृत्तिमेत्य ।
एकोऽपि द्वादशात्मा निजतनुमहसा पातु वर्णी भवन्वो
हर्तुं त्रैलोक्यलक्ष्मीं स्वयमसुरपतेश्छद्मना पद्मनाभः ॥ ९ ॥

वज्रक्रूराग्रशङ्काकरकरजशिखाभिन्नहैरण्यवक्षः-
पीठप्रस्त्यायमानध्वनिभरभरितध्वस्तविध्यण्डभाण्डः ।
प्रह्लादाह्लादहेतोः सह विबुधमुदाविर्भवन्स्तम्भगर्भा-
दंहःसंहारकारी स भवतु भवतां रंहसा श्रीनृसिंहः ॥ १० ॥

आव्यादव्याजलेशप्रसृमरकरुणासारपीयूषधारा-
धारापाङ्गावलोकप्रशमितविनतापारसंसारतापः ।
क्ष्मोल्लक्षोदरक्षोभकरमिषुवरं दक्षिणे वामहस्ते
चापं चापन्निवृत्त्यै दधदखिलजगद्रक्षदक्षद्रामभद्रः ॥ ११ ॥

निर्हेतुप्राप्ततादृङ्निजपितृनिधनामर्षदुर्वारवेग-
प्रारब्धक्षत्रगोत्रक्षतरुधिरसरःस्नानतीर्णप्रतिज्ञः ।
पार्थाद्यत्कार्तवीर्यार्जुनभुजविपिनाकुण्ठकौठारधारो
रामः पायाद्भृगूणां पतिरिह वितरन्काश्यपीं काश्यपाय ॥ १२ ॥

सीराग्रोत्क्षेपणावाङ्मुखितसुरनदीवारिपूरान्तरस्व-
च्छायासंदर्शनोत्कीकृतकुरुनगरीदृष्टदोर्वीर्यसारः ।
रेवत्यापीतशेषासवरसभजनारक्तनेत्रान्तशाली
ज्येष्ठः श्रीकृष्णमूर्तेः स भवतु भवतां कामदः कामपालः ॥

दत्तां तत्तादृशीं वः श्रियममृतरसोद्गारिवेणुप्रणाद-
प्रस्विन्नक्लिन्नगोपीजनविवशपरीरम्भसंरम्भधन्यः ।
चञ्चत्पिञ्छावतंसस्तबकितचिकुरो रासकेलीसतृष्णः
कृष्णो मुष्णन्नतार्तीरविरतयमुनातीरवानीरवासी ॥ १४ ॥

कल्पादौ प्रागकल्पक्रमरुचिरचनां नीचमार्गोचितां यः
कुर्वन्यज्ञेषु निन्दामपि च करुणया प्राणिहिंसात्मकेषु ।
स्वच्छामच्छिन्न नित्यश्रुतिगणविहितां पद्धतिं बुद्धरूपः
सोऽयं देवो मुदे वो भवतु भवतुषप्लोषनिःशेषकारी ॥ १५ ॥

मूर्च्छन्म्लेच्छप्रपञ्चव्यतिकरबलवज्जृम्भमाणातिवेल-
क्रुध्यत्तिष्यप्रतापप्रसरकबलिताशेषवेदोक्तधर्माम् ।
त्रातुं गां विष्णुशर्मक्षितिसुरसदने शम्बले संभविष्य-
न्कल्की सर्वान्समोदं स घटयतु शुभांस्तेजसार्कीभवन्नः ॥११॥

आत्मीयाज्ञाविधेयीकृतगिरिशहरित्रह्मदेहार्धवक्षो-
वक्त्राब्जारोपितस्त्रीप्रथितनिजभुजाविक्रमोपक्रमश्रीः ।

त्रैलोक्यस्यापि जेता मृदुकुसुमशरैरद्भुतः कोऽपि धन्वी
केलीकालेऽनुकूलो भवतु विरहिणीघस्मरो वः स्मरोऽयम् ॥

पक्षाग्रक्षेपलीलाविसरदुरुमरुद्वेगनिश्चूर्णिताम्भः-
शून्याम्भोराशिगर्भस्फुटतरलजलावासवित्रासकारी ।
दास्यन्मातुर्न्युदस्यन्नमृतकलशहृत्त्रस्यदिन्द्रस्य हस्ता-
द्रक्षेच्चक्षुःश्रवोभ्यः सकलविषभयं विक्षिपन्पक्षिराजः ॥ १८ ॥

निद्रामुद्राविराजन्मुरमथनतनूल्लिप्तकर्पूरपूर-
श्रीखण्डक्षोदसङ्गद्विगुणधवलिमोत्कर्षसाभोगभोगः ।
आधारस्तम्भशोभां दधदिव जगतां केशवाम्भोधिकन्या-
लीलाविस्रम्भसाक्षी घटयतु पटुतां वो गिरो भोगिराजः ॥

लक्ष्मीकण्ठाभिरामो मुरमथनमुखाम्भोजसंभूतवात-
व्राताध्मातप्रभूतस्तनितबधिरितस्फीतरोदोन्तरालः ।
अन्तःसंतापशान्त्यै भवतु भवतुदः संततं कान्तिपूर-
स्मेरज्योत्स्नावितानैः शशिकरनिकरं संचयन्पाञ्चजन्यः ॥२०॥

पायाद्वैकुण्ठधाम्नः करिकृतकरुणाक्रन्दमाकर्ण्य तूर्णं
शय्योत्थायं सवेगोद्दुरपदगमनस्रस्तपीताम्बरस्य ।
कोपात्साटोपमग्रप्रहितमहितहृत्पद्मसद्मास्त्रविस्रं
चक्रं च क्रन्ददुग्राग्रहभरभरितग्राहनिग्राहि तन्नः ॥ २१ ॥

मूर्तेर्वाञ्छा मुरारेः परमपदमहोदारवैकुण्ठपुर्यां
वैकुण्ठस्योपकण्ठार्थिभिरमरवरैर्वाच्यमानः सकाकु ।
लिङ्गैरङ्गेषु विष्णोः सततमभिगतो नायकः सैनिकानां
विष्वक्सेनः स विष्वक्समुपनयतु वो द्राक्कृपां चक्रपाणेः ॥२२॥

ब्रह्माण्डाकाण्डदाहप्रसजनजनितोत्तालकोलाहलेन
त्रस्ते लोके समस्ते सपदि महविपदि क्रूरहालाहलेन ।
वृन्दैर्वृन्दारकाणां विधिविधुहरिदीशादिभिर्यैः स्तुतस्तं
जम्बूलीलामनम्बूकृतमनयदसौ साम्बमूर्तिः स वोऽव्यात् ॥

संरम्भोज्जृम्भिजम्भद्विषदतुलभुजस्तम्भगम्भीरदम्भ-
स्तम्भोद्यद्गर्वशुम्भप्रमुखपशुगणालम्भदीक्षैकदक्षा ।
कल्पास्खड्गाग्रकृत्ताद्भुतमहिषशिरोनर्तनोदात्तचित्ता
दत्तां वित्तानि तत्तादृशमहिमवती हैमवत्यम्बिका वः ॥ १४ ॥

हस्ताग्रोदस्तसप्तार्णवसकलपयःशीकरासारवर्ष-
प्रारब्धाकाण्डमूर्च्छन्निबिडितमहिमोन्नीतमातामहश्रीः ।
बाल्यक्रीडातिलौल्याद्रदशिखरसमुत्क्षिप्तसर्वक्षमाभृ-
देवः पायादपायान्नतजनसुलभः कोऽपि वेतण्डतुण्डः ॥ २५ ॥

विघ्यण्डाखण्डभाग्योदुरविकटबलत्तारकप्रष्ठदैत्य-
श्रेष्ठासृग्ग्रासकुक्षिम्भरिरविपटलीदुर्निरीक्षोग्रशक्तिः ।

गङ्गावल्लीमहाद्रुः सुरपतिविजयानन्दसंदोहकंदः
स्कन्दो दद्यादमन्दां श्रियमनवरतं पार्वतीनन्दनो वः ॥ २६ ॥

समदोत्सारणोद्यत्कनकमयकनद्वेत्रदण्डप्रहार-
प्रत्युटयदीप्रहाराङ्गदमकुटदिगीशादिकाकूक्तिहृष्टः ।
गाढग्भूयःशिलादप्रकलततमतपोभाग्यभूम्नां विवर्तः
सेनानीश्चन्द्रमौलेः स भवतु भवदानन्दनो नन्दिकेशः ॥२७॥

नाभं हावं शिरांसि ज्वलति हुतभुजि स्वासिना साहसेन
च्छित्त्वान्याशु प्रसीदत्पशुपतिवचसा प्राप्तसंपूर्णकामः ।
रामोत्कृत्तैः शिरोभिः समिति पुररिपोर्भाविताभ्योपहारो
गाणापत्यं प्रपन्नः स भवदभिमतं रावणः संविधत्ताम् ॥२८॥

कैलासेनैव साकं निवसति भवनद्वारि यस्येन्दुमौलि-
ज्ञातुं यं त्वत्कलज्ञा परपुरुषसभाकोटवी चाम्बिकाभूत् ।
कृष्णेन च्छिन्नदोषं तनयमिव परीरभ्य यं वत्सलत्वा-
वक्रे निष्कैशमीशः स भवतु भवतां भूतये हन्त बाणः ॥

गर्भद्वारावरोधस्थिरहृदयसामरूढचन्द्रावतंसः
श्रीमत्पादारविन्दद्वयभजनपराभूतबाह्यप्रपञ्चः ।
शंभोः सेवाफलार्थं प्रणतजनकरास्फालनाबोध्यमानो
भक्त्या पुत्राधिकत्वं दधदिह शिवयोः पातु चण्डः प्रचण्डः ॥

देवं शंभुं विनैकं तदितरपदयोरानतिं नाचरेयं
प्रादक्षिण्यक्रमं वेत्यवितथशपथो वीक्षितुं तत्परीक्षाम् ।
एकीभूतेऽम्बयास्मिन्सपदि सुषिरयन्भृङ्गभूतोऽङ्गसंधिं
योऽभूत्सत्यप्रतिज्ञः स शिवपदरतो मङ्गलायास्तु भृङ्गी ॥ ३१ ॥

भस्मस्वच्छत्रिपुण्ड्रा ज्वलदनलदृशो मेचकानीचकाया
विद्युद्द्योतमानप्रचलघनबलाकावलीकाम्बुदाभाः ।
रूक्षा रुद्राक्षभूषाः प्रहरणनिवहोद्दण्डदोर्दण्डभाज-
श्चण्डाश्चण्डेश्वराद्याः प्रमथगणगणाः पान्तु वः सान्त्ववादैः ॥

अत्यन्तप्रेमनृत्यत्प्रमथगणगणप्रस्तुतस्तोत्रभङ्गी-
घोषोद्भूतप्रतिश्रुद्भरभरितदरीपावनोपत्यको वः ।
माद्यद्गन्धर्वविद्याधरसुरयुवतीगीतशैवापदान-
श्रुत्युद्यत्प्रीतिबाष्पाकुलमुनिनिबिडः पातु कैलासशैलः ॥ ३३ ॥

मार्कण्डेयावनार्थं दलितकरवलत्पाशकीनाशदेव-
व्यूढोरःपीठगाढद्रुतरुधिरवसापङ्कसंक्रान्तवर्चाः ।
अर्चिःखद्योतितद्योमणिरहितशिरःशूलसंधानशीलः
शूलः शैलेन्द्रकन्यापतिकरचलितः शिक्षयेद्वो विपक्षान् ॥ ३४ ॥

ससाकूपारपारीवलयितसुमहाचक्रवालाद्रिचक्रा-
क्रान्तिप्रेङ्खन्मयूखप्रकरकबलिताशेषलोकान्धकारः ।

[illegible] सर्वग्रहाणां रजनिजनिभयोद्वेजिराजीवराजी-
जीवातुः पातु पूषा वपुषि परिगताशेषदोषप्रमोषी ॥ ३५ ॥

[illegible]न्याश्विन्यादितारानवनवयुवतीनैकसंभोगभङ्गी-
वैचित्र्यानन्दभेदानुभवरसिकताधन्यमूर्धन्यमान्यः ।
[illegible]श्चिव्यं मन्मथस्य त्रिभुवनजयिनः स्वैः करैरेव कुर्व-
[illegible]शर्वस्याष्टांशमूर्तिः शिशिरयतु स वः शर्वरीसार्वभौमः ॥३६॥

[illegible]र्षाकालीनवर्षोन्मुखनिखिलादगृद्धूतजीमूतजाल-
प्रोत्साहोत्साहवल्गद्धनमुसलगदाभीमहस्तैः समस्तैः ।
[illegible]त्यन्तसख्यैः सततमभिगतः किंकराणां सहस्रैः
शत्रूणां सप्तमस्थः स भवतु भवतां मङ्गलो मङ्गलाय ॥३७॥

[illegible]ध्यं रेतोधसा यो भजति तनुरुचा क्षेत्रिणा तुल्यबुद्धिः
कन्यायुग्माभिलाषी तदपि बुध इति प्राप य पुण्यकीर्तिम् ।
[illegible]डयं निर्मातु सायंसमयपरिदलन्मालतीजालतीव्रा-
मोदं वादं मतिं वोऽपि च सकलकलारोहिणीं रौहिणेयः ॥

[illegible]सस्थानावलीढत्रिदशपरिबृढस्वर्गसाम्राज्यलक्ष्मी-
निष्प्रत्यूहानुभूतिप्रतिदिनविधृतप्रातिभाव्यप्रयासः ।
[illegible] [illegible]र्हस्पत्यनीतिप्रणयनचतुरो योऽङ्गिरोभाग्यराशि-
र्भीवैशद्यं स दद्याद्वचसि च पटुतां लौकिके वैदिके च ॥३९॥

नित्यं दैत्येन्द्रसेनाजयकरमृतसंजीवनीदिव्यमन्त्र-
　च्छात्रीभावाभिलाषित्रिदशगुरुसुतप्रापितानुग्रहो यः ।
नीतौ यश्चौशनस्यां प्रकटितकपटोपायतन्त्रप्रकारः
　काव्यो वो भव्यकाव्यप्रणयनचतुरां सोऽद्य बुद्धिं विदध्यात् ॥

पीडां राशित्रयस्थो दशरथनृपतेः सार्धसप्ताब्दकालं
　कुर्वन्यः सर्वसाधारणमथ रथिना तेन शौर्योद्धुरेण ।
संग्रामे बद्धसख्यो मदमिह पठतां तत्कृतस्तोत्रमासी-
　द्भूयाद्वः शान्तवाणां शनिरयमशनिः क्लेशनिर्हारकारी ॥ ४१ ॥

यत्पैशुन्येन पङ्कावभृतलवभुजौ चक्रिचक्राग्रकृत्तौ
　तद्दोषादेव रोषादहिमहिमकरग्राहलक्षेण लोकान् ।
अम्भोधौ मज्जयन्तौ दुरितजलनिधेः क्षिप्रमुन्मज्जयन्तौ
　त्रायेतां तुल्यकालौ गतिषु घनतमोदेहकौ राहुकेतू ॥ ४२ ॥

गाणिक्याधिक्यसंपत्प्रमदमदभरारम्भरम्भादिसुभ्रू-
　संभोगोज्जृम्भिकुम्भस्तनसुदृढपरीरम्भसंभावितश्रीः ।
सम्राडेकत्रिलोक्याः सुचिरचितशचीसौख्यसर्वस्वहारी
　नैत्रैः सर्वैर्विदध्यात्स्थिरविभवमिहाखण्डमाखण्डलो वः ॥ ४३ ॥

त्रुत्क्षामक्षामसर्वत्रिदशपरिषदादीनवाद्दीनवाद-
　प्राप्तः स्वर्वासिदूत्योपनतमखहविर्भागवाहप्रयासः ।

स्त्रीभ्यां स्वाहास्वधाभ्यां निबिडदृढकुचाभोगगाढोपगूढः
पापारण्यान्यारण्याश्रितनिजजननः पावकोऽयं प्रदह्यात् ॥ ४४ ॥

भीमभ्रूभङ्गभङ्गीविकटपरिनटत्तारकादुर्निरीक्ष्य-
व्यात्तभ्राष्ट्रोपमाननतटघटितारालदंष्ट्राकरालः ।
आरूढप्रौढवाहद्विषदवनिपतिः पापिनामुग्ररूपः
काले वः सौम्यमूर्तिः स तु भवतु तदा वान्तकोपोऽन्तको वः ॥

दंष्ट्रावज्राङ्कुराग्रप्रथितदृढतरोत्तप्तनिष्कासनोद्य-
द्व्यत्यस्तोल्लेलिहानभ्रचलितरसनापन्नगो भीमवक्त्रः ।
आबिभ्राणः करालं कमपि च करवालं महाभीमकायः
क्रव्यादव्यादशेषद्विषदुपधिविधाविष्कृताद्दुष्कृताद्वः ॥ ४६ ॥

फूत्कुर्वत्फण्यधीशप्रतिभयदिविषद्वृन्ददुर्मोचताद्य-
कपाशव्याबद्धनानावृजिनमयजनस्तोमदण्डप्रचण्डः ।
पश्चार्धे यश्च रक्तान्यनुपधि जगतां सर्वबीजप्ररोह-
प्रारम्भश्रीनिदानं स हरतु दुरितान्यप्पतिर्दिक्पतिर्वः ॥ ४७ ॥

सत्त्वप्रायः परीक्षाकलितफणफणिग्रामणीसत्फणालि-
प्रच्छन्नस्वर्णभूभृच्छिखरसरभसोत्क्षेपदक्षप्रयत्नः ।
सप्तस्कन्धात्मकः सन्सकलदिविषदां नित्यमाधारभूतो
दत्तां वः सत्त्वयोगं वपुषि बहुरुजादुच्यवायुश्च वायुः ॥ ४८ ॥

विष्णुब्रह्मादिदेवासुलभपुरहरप्रेममित्रत्वसंप-
त्संप्राप्तिप्राप्ततादृङ्नवनिधिविभवाधीशताराजराजः(?) ।
यः कैलासे गिरीन्द्रे भजति पशुपतेर्नित्यसामन्तभावं
स श्रीमान्संततं वो वितरतु विभवानक्षरान्यक्षराजः ॥ ४९ ॥

ग्रैवेयत्क्षुद्रघण्टानिवहघणघणात्कारिकण्ठोपकण्ठ-
प्रक्रीडच्छाकरेन्द्रत्रिकघटितकुथाग्रेषु पृष्ठाधिरूढ (?) ।
सार्धं देव्याम्बयार्धं वपुषि च गतया ससरन्हंसवर्णः
संमेदी त्वंहसां वो वसतु मनसि सोत्प्रासमीशानदेवः ॥ ५०॥

सोढुं धामाक्षमत्वात्परिधृतबडबारूपसङ्गानुधाव-
त्कर्कीभूतार्कतेजःप्रचयभरिततन्नासिकागर्भजातौ ।
सर्वस्वर्वासिवैद्यौ सकलपुमुपमात्मीयरूपावजस्रं
दस्रौ वः श्रीनिदानं वपुषि वितरतां स्फारमारोग्यभारम् ॥

आशापूर्तिं दशाशा विदधतु भवतां यत्र वृत्रारिमुख्याः
सत्राशेशा वसन्तो हरिदधिपतयः पान्ति लोकानशेषान् ।
अभ्रम्वाद्याः करिण्यो निजपतिभिरिभैर्यान्ति यत्र व्यवायं
शुद्धोदन्वज्जले वाप्यवधिधरणिभृद्भण्डशैलान्तरे वा ॥ ५२ ॥

पायाद्विष्णोर्द्वितीयं पदमतिविमला यत्र निर्णेजनाम्बु-
भ्रान्तिं धत्ते युगाग्रा दिनकरशशिनौ यस्य गुल्फायमानौ ।

नतानीभूय भूयः प्रसृत इह गुणो यस्य वीचीतरङ्ग-
न्यायेनानीयमानः प्रविशति मरुता प्राणिनां कर्णवीथीम् ॥

गाङ्गत्वङ्गदश्वन्यपगमकृतरुट्सागरोद्दण्डबाहा-
दण्डोत्खाताखिलक्ष्मातलविवरसमाक्रान्तिसंवर्धितात्मा ।
भीदेव्या जन्मभूमिर्वसनमथ भुवः क्षमाधराणां शरण्यः
पुण्यागण्यप्रभावो जलधिरखिलदिग्व्यापनो नः पुनातु ॥५४॥

द्वागङ्गासङ्गभाग्यात्त्रिजगदधिपतेः पुण्यतोया वहन्ती
गङ्गागं गाहमाना जनदुरितवनीविष्वगङ्गारतुल्या ।
वेगं गाधेतराम्भःस्वनितरतटिनीपूरगं गाढमास्ता
स्वर्गं गाथाशतेड्या वितरतु समये सौभगं गायतां वः ॥५५॥

आमन्दस्पन्दमानालसपवनलसत्तीरवानीरकुञ्ज-
क्रोडक्रीडद्यशोदासुतपदकमलन्यासधन्योपकण्ठा ।
श्रोणीवेणीयमाना जलचरविलसन्नीलवेणीमनोज्ञा
कालिन्दी सा मिलिन्दीमिलितकुवलयैरक्षता रक्षतादः ॥५६॥

योगिभेष्ठं वसिष्ठं द्रुतमुपतटमाक्रष्टुकामस्य पूरै-
र्विश्वामित्रस्य नेत्रद्युतिभिरिव रुषा रक्तिमासक्तिमास्ता ।
तप्तापस्येव भीतेरसितसितसरिद्वारिमध्ये निलीना
सिन्धुभेष्ठा सरस्वत्यघतिदलिनी सा पुनर्वः पुनातु ॥ ५७ ॥

भक्त्युद्रेकप्रहृष्यत्तटनिकटनटद्घाणपूजावसान-
व्याकीर्णस्थाणुलिङ्गप्रकरनिपतनस्फायदोंकारकुण्डा ।
बद्धा सा पश्चिमाब्धौ तटभुवि जपतां तत्क्षणात्सिद्धिदात्री
धन्या शीतांशुकन्या प्रभवतु समये निर्मदा नर्मदा वः ॥५८॥

चञ्चद्वाचालवीचीनिचयपरिचयोदञ्चदानन्दमान्द्र-
स्वच्छन्दक्रीडदच्छच्छदगणमधुरालापमेदस्विपूरा ।
अम्भोधेः संगमाशां भृशमिव दधती सप्तधा क्लृप्तधावा
गोदा गोदावरी सा भवतु भवभयच्छेदिनीच्छावशाद्वः ॥ ५९ ॥

नित्यं हारिद्रभूरिद्रवकृतनिबिडोद्वर्तनानर्तनोच्चै-
र्निश्चोलीभूतचोलीकठिनकुचतटावट्टनोत्कर्णिता या ।
शृङ्गारोत्तुङ्गरङ्गप्रभुवरमभितो वैजयन्तीव भान्ती
धन्या सह्याद्रिकन्या विरचयतु शुभं सर्वदा सर्वदा वः ॥६०॥

फुल्लत्कह्लारनीलोत्पलकमलवनीकालनिर्भिन्नगर्भ-
प्रोदञ्चच्चञ्चरीकीनिचयरुचिभरस्थापितान्वर्थनामा ।
पात्रे नित्यार्पितश्रीर्बहुतरसुकृतैः शान्तसिष्णासुतृष्णा
कृष्णा पुष्णातु कामानविरतमपि वो राजहंसावतंसा ॥ ६१ ॥

स्वीयं हैयङ्गवीनद्रवमिव सलिलोत्पीडमाशुद्रहन्ती
रोधोरोहोद्यदुच्चक्षितिरुहपटलीनिष्पतत्पुंष्पताम्रा ।

राज्ञी राज्ञो मनोज्ञा सकलजलपतेः संततग्रामसीमा-
सन्ना षण्णामपि द्राग्दलयतु पटुतां तामरीणामरीणाम् ॥ ६२ ॥

ऐश्वर्योद्दण्डपाण्ड्यस्मयहरणकृते भीक्षितान्नक्षमाभृ-
त्तुत्क्षामक्षामकुक्षिप्रबलजनिततृट्क्षोभकुम्भोदरस्य ।
स्फारोदन्यानिवृत्त्यै दरविवृतजटाजूटतः शंभुमुक्ता
भूयाद्भूत्यै प्रवृत्ता परिमधुरामयं वेगवत्यापगा वः ॥ ६३ ॥

पायाद्वस्ताम्रपर्णी कलिभयरहिता दक्षिणा सा नदीनां
लोपामुद्राधिनाथत्रिषवणविहितप्रत्यहस्नानपूता ।
जायन्ते हन्त यस्याः किल जलनिधिना संगमे पुण्यवेले
सद्वृत्ता एव मुक्ताः श्रुतिपरिचायिनो निर्मला मर्मलाभात् ॥

मेरुर्भास्वन्नमेरुः स भवतु भवतां कल्पकल्याणदायी
तुङ्गैः सद्रत्नशृङ्गैरनुपहति जगद्रत्नदीपायमानः ।
विभ्राम्यन्यन्नितम्बेऽम्बरमणिरभितोऽप्यन्धकारेण साकं
दीव्यन्माणिक्यनीलोपलघटितवलच्चक्रशङ्कां करोति ॥ ६५ ॥

पायाद्वो मन्दरागस्तटनिकटगलद्वैरिकामन्दरागः
प्रस्थैर्यो रत्नपूर्णैरुपरचितमहार्घोपहारः शिवाय ।
दृप्यद्दैत्यामरेन्द्रप्रबलभुजबलाकृष्टनिर्घृष्टपिष्ट-
भ्राम्यद्दण्डोपलैर्योऽकृत कमठपतेश्चण्डकण्डूतिशान्तिम् ॥ ६६ ॥

श्रेयो भूयो विदध्यात्प्रथितमहिमवानोषधिप्रस्थनाथः
शैलानां सार्वभौमः स जगति हिमवाञ्जन्मभूर्हैमवत्याः ।
पर्यन्ते यस्य दर्यन्तरगृहगतरागान्धगन्धर्वनारी-
संगीतैस्तु त्यदीयं सततमपि यशः प्रायशः स्त्यायते च ॥

प्रत्यासन्नप्रभिन्नत्रिदशपतिकरिग्रामणीवप्रलीला-
दन्ताग्रोत्क्षिप्तसानुक्षितिविषमतटप्रस्खलद्भानुचक्रः ।
नाथः पाथोजिनीनां क्षणमिव च शिरोरत्नमुच्चैर्दधानः
श्रीमान्पूर्वाचलेन्द्रो मनसि चिरधृतानन्धकारान्धुनोतु ॥ ६८ ॥

अन्तर्मग्नार्धबिम्बाम्बरमणिकदनामन्दमन्देहबृन्द-
ध्वंसे वज्रायमाणाञ्जलिपुटसलिलैरुन्मुखैर्वीक्ष्यमाणः ।
आबिभ्राणः प्रतीचीनिटिलघटितगोरोचनाबिन्दुमर्कं
सोऽयं वोऽस्तं समस्तं गमयतु दुरितस्तोममस्ताचलेन्द्रः ॥

वैदेहीलोभनेच्छारचितगिरिसरित्कंदरा वृक्षराजी-
संपद्व्यावर्णनश्रीरघुपतिचरणन्यासधन्यप्रदेशः
पायाद्वश्चित्रकूटः कुतुकिजनकजादत्तबर्हांसुराग्र-
प्रासोपासन्नहंसीसमुदयकलितानन्दमन्दाकिनीकः ॥ ७० ॥

दुर्गाजीवोपहारप्रकृतनरपशुप्रस्रुतास्रप्रवाह-
प्लीहक्लोमान्त्रमालापरिणतघनजम्बालसंबाधभूमिः ।

तुङ्गानेकस्वशृङ्गप्रतिहतगतिकव्योमसंचारिलोको
विन्ध्यः पायादवन्ध्यप्रतिघकलशजादेशमूर्धावतंसः ॥ १७ ॥

लोकेशीमेकवीरां धृतविनयभयं सेवितुं प्राप्तवन्दि-
र्निस्तन्द्रैर्निर्जरेन्द्रैरनुदिनमपि यः सान्द्रितस्वीयपादः ।
दत्तात्रेयस्य विष्णोरपि च भगवतो नित्यमावासभूतः
सह्यः स ह्यद्भुतश्रीः क्षितिभृदवतु वश्चोलरक्षासदक्षः ॥ ७२ ॥

होमार्थं कुम्भयोनेः प्रतिदिनमुपयातेध्मवाहादिशिष्य-
च्छिन्नश्रीखण्डखण्डप्रसृतपरिमलाक्रान्तदिक्चक्रवालः ।
तातो वातार्भकाणामवतु स मलयो वामनावामनोद्य-
च्छुण्डादण्डावनम्रत्रुटितबहुजरच्चन्दनो नन्दनो वः ॥ ७३ ॥

सप्ताकूपारखेयावलयितधरणीमण्डलीधूर्वहाणां
सर्वक्षोणीभृतां यः कलयति परितश्चित्रवप्रप्रकारम् ।
यस्मिन्नारक्षरीत्या भ्रमति दिनकरः सिद्धगन्धर्वबाद्यैः
शैलेन्द्रश्चक्रवालः स किल वितनुतां चक्रवर्ती श्रियं वः ॥७४॥

ये चान्ये स्वर्णकूटत्रिककुदवनिभृन्माल्यवत्पारियात्र-
प्रष्ठाः श्रेष्ठा गिरीणां सततवसतयः सिद्धविद्याधराणाम् ।
तेऽमी चामीकराद्रेः सदृशगुणगणाः पावनाः पापजालं
दुरीकुर्वन्तु सर्वं तुहिनमिव हि वः पल्युरङ्कां मयूखाः ॥ ७५ ॥

दिक्पालाद्यस्त्रजालं निखिलमपि बलाद्भक्षयित्वा क्षणेन
प्रोद्दण्डो यस्य दण्डो बलिनमपि तदादण्डयद्राधिसूनुम् ।
पीता पैतामहास्त्रोन्नतिरपि तपसा येन ताताधिकेन
श्रेष्ठोऽयं तापसानामवतु स भवतो योगनिष्ठो वसिष्ठः ॥७६॥

यो दृश्यन्तीसुगर्भे कृतनिवसतिरभ्यस्तनिःशेषविद्यो
यः सत्यां सत्यवत्यां तनयमजनयल्लोकनिर्व्याजबन्धुम् ।
चक्रे यश्च स्मृतीर्दुष्कलिमलहतये वैष्णवं सत्पुराणं
रक्षोयज्ञस्य यष्टा स च मुनितिलको व्यासतातोऽवताद्वः ॥७७॥

एकीभूताविशेषग्रहविविधवचोवेदराशेर्विवेक्ता
व्यस्यस्तप्राक्पुराणप्रवचनचतुरः केशवांशावतारः ।
आनेता स्वर्गतानामपि पुनरवनीं स्त्रीकृते कौरवाणां
पाराशर्योऽवताद्वः प्रणयनकुशलः पञ्चमस्यागमस्य ॥ ७८ ॥

सार्कं सेन्द्रं सचन्द्रं त्रिभुवनमपरं निर्मिमाणेन येन
त्रस्ता देवाः समस्ताः समजनिषत यच्चाटुकाकूक्तिवादाः ।
निर्वोढुं यः प्रतिज्ञां समजनि च हरिश्चन्द्रचन्द्रस्य राहु-
र्विश्वामित्रोऽपि मित्रीभवतु च भवतां विश्वमित्रायमाणः ॥७९॥

सौवाग्नीन्सान्तरीपान्साशिखरिनिकरान्साच्युतांश्चान्ततो यः
सीघून्स्वल्पाम्बुबिन्दूनिव करकमलेऽधत्त तेजोमहिम्ना ।

जेता वातापिनाम्नः स्वयमसुरपतेर्विन्ध्यसंस्तम्भकारी
क्लेशाम्भोधिं समस्तं स बत पिबतु वस्तापसः कुम्भजन्मा ॥

कुप्यत्कालावलोकप्रभवभयभरालिङ्गितस्थाणुलिङ्ग-
प्रादुर्भूतेशदत्ताभयसमुपनमन्नित्यतारुण्ययोगः ।
मार्कण्डेयश्चिरायुर्वितरतु भवतां ब्रह्मघस्रावसान-
प्रारम्भैकार्णवाम्भःकबलितभुवनानल्पकल्पान्तसाक्षी ॥ ८१ ॥

मारीचः काश्यपोऽव्यादितिदनुविनताकद्रुदित्याद्यपत्य-
प्रायैर्यो भूर्भुवःस्वस्त्रिभुवनभवनैर्भूरिससारभारः ।
अन्योन्यस्पर्धमानत्रिदशपरिबृढप्रौढदैत्याधिराज-
प्रक्रान्ताक्रन्ददूरीकरणसमसमाधानदत्तावधानः ॥ ८२ ॥

हस्त्यश्वं वः पुलस्त्यः प्रथयतु विततं यस्त्यजन्नित्यकर्म
क्रूरक्रव्यादधीशव्यसनपरिहृतिप्राप्तसर्वानुनीतिः ।
भक्त्युद्रेकोपपन्नप्रगुणगुणगणप्रक्षयक्षेन्द्रलक्ष्मी-
वीक्षासंवर्धमानप्रतिदिनहृदयानन्दसंदोहसान्द्रः ॥ ८३ ॥

मिष्टान्नं प्रत्यहं वो वितरतु स भरद्वाजयोगी महेच्छो
वल्लीर्वृक्षांश्च नारीनरायतुमहह ख्याततेजःप्रभावः ।
कैकेयीसूनुसेनाप्रतिपुरुषचतुःसप्तपञ्चाष्टदिव्य-
श्यामानेकोपचारप्रथितनिरुपमातिथ्यसत्कारकारी ॥ ८४ ॥

आयान्ती सत्यलोकादवनितलमिदं पूर्वपादप्रचारा
वाग्देवी पुण्यतीर्थेऽङ्कुरितकुशलवे यत्र विश्रान्तिमासा ।
सोऽयं रामावतारादुतचरितकथानाटिकासूत्रधारः
श्रीमान्वल्मीकजन्मा दिशतु कृतजगत्सौहितीं साहितीं वः ॥

पायाद्वः शौनकार्यः प्रथितपृथुयशा नैमिशारण्यवासी
यच्छात्रे बह्वृचानां गुरुरतितपसा तोषितश्रीनटेशः ।
प्रख्यातो हौत्रभागप्रकरणगहनप्रक्रियानैकभङ्गी-
साङ्गोपाङ्गप्रपञ्चावगमसुलभसत्सूक्तिसूत्रप्रणेता ॥ ८६ ॥

मेधां बोधायनो वो वितरतु सहितः षष्टिसाहस्रशिष्यै-
र्यस्यापस्तम्ब एकाधिकशतयजुषां पारगो मुख्यशिष्यः ।
सूत्रं प्रायुङ्क नैकक्रमविधिनिपुणाध्वर्युनानाप्रयोग-
व्यक्तिज्ञानोपयुक्तस्फुटमृदुगहनप्रौढसंदर्भगर्भम् ॥ ८७ ॥

देवर्षिर्नारदोऽव्यात्करधृतमहतीपर्वनिस्तन्द्रतन्त्री-
निर्व्याजोदित्वरश्रीहरहरिगुणसत्कर्मनामप्रकर्षः ।
ये चान्ये मान्यरूपा दिवि भुवि सनकप्रष्ठदेवर्षिसंघाः
सर्वे ते कुर्वतां वः परमगतिकृते ज्ञानमज्ञानशून्यम् ॥ ८८ ॥

शास्त्राणां ये च सूत्रप्रणयनपटवो ये च सप्तर्षिभेदा
ये चान्ये वालखिल्याः शमदमनिधयो ये प्रसिद्धाः पुराणे ।

लोकानां पावनास्ते प्रथितसुचरिता भूर्भुवःस्वर्निवासा
देवब्रह्मर्षिसंघाः शिवमनवरतं कुर्वतां सर्वदा वः ॥ ८९ ॥

शाखाभेदैरनेकैर्द्विजकुलकलितोद्घोषवद्भिः समेताः
कृच्छ्रारोहावरोहा विततबहुजटाः काण्डवर्गैरपेताः ।
विस्तीर्णाः किं च नानासवफलसहिताः सेविताः सत्पथस्थै-
श्चत्वारो वः क्रियासुर्निगमविटपिनो हन्त संतापशान्तिम् ॥

नित्यं संवर्धितात्मावितथबहुकथापुण्यशैवालिनीभिः
स्थानं गीतासुधायाः क्षितिसुरनिवहैः सादरैर्मथ्यमानः ।
मध्ये विष्णुं दधानस्त्रिभुवननिलयं पर्वसु प्राप्तसंप-
त्सर्वं वो भारताम्भोनिधिरयमपरः पापजालं पुनीयात् ॥९१॥

नन्वाद्यैर्मानवानां निरुपधि हितमावेदयद्भिर्मुनीन्द्रै-
र्मन्वाद्यैः संप्रणीता स्मृतिरिह निखिलाप्यागमार्थैकवाक्या ।
अन्यप्राकृष्यमाणप्रचलरथपुरश्चक्रमार्गानुधाव-
त्पश्चाच्छत्राग्ररीतिः परिणमयतु वो धर्मबुद्धिं विशुद्धाम् ॥९२॥

प्रायः पापिष्ठबुद्ध्या निजनिजमतसंस्थापनायेशविष्णवो-
र्हन्तोत्कर्षापकर्षग्रहभृतमनसां दूरतो निष्फलानि ।
सर्वत्रैवाविरोधान्यधिमहि नहिनिन्दाद्रुतन्यायभाजा-
मव्यासुः सेतिहासागममनुदिवसं वः पुराणानि कामम् ॥९३॥

वाल्मीकेर्वक्त्रपद्मादुपगतजननः सर्वविख्यातकीर्त्ति-
हंसैः सत्पक्षपातैश्चरमतनुधृतः काण्डसंपत्समेतः ।
पुण्यश्लोकप्रतीतो विदलितशतपत्राधिरूढाक्षरश्रीः
कुर्याद्रामायणाख्यो विधिरयमपरः संततं संततिं वः ॥ ९४ ॥

यद्बीजं जन्मबीजप्रचयदहनकृद्यस्य सारो निपीतो
द्राङ्मातृस्तन्यपानं परिहरति नृणां यच्च नैवागमान्तात् ।
प्रभ्रश्यत्यन्वहं यत्प्रथितशुकमुखास्वादनात्सारभूतं
स्यादामोदाय तद्भागवतफलमिदं नित्यमत्यद्भुतं वः ॥ ९५ ॥

मीमांसे द्वे सतर्के फणिपतिफणितं योगसांख्यौ च शास्त्रा-
ण्याम्नायाङ्गानि शेषाण्यपि च जगति येऽन्ये च वाणीविलासाः ।
सर्वे ते कुर्वतां वः सकलविषयधीघर्षशाणायमाना
नित्यं बुद्धेर्विकासं भुवि निखिलजगत्तत्त्वविज्ञानहेतोः ॥ ९६ ॥

सृष्टिस्थित्यन्तकर्मस्वजहरिगिरिशा येन नित्यं नियुक्ता
ज्योतिश्चक्राण्यशेषाण्यविरतमपि यो भ्रामयत्यात्तवेगम् ।
दुर्वारः स्वप्रवाहः प्रबलनिजबलः पूर्वपूर्वापहन्ता
कालो निष्पक्षपातो भवतु बहुजगद्भक्तको रक्षको वः ॥ ९७ ॥

साकेतः केतनाग्रप्रथितविततसत्केतुचीनांशुकोद्य-
द्वातव्रातापनीतश्रमहरविहरन्मुग्धासिद्धाङ्गनौघः ।

स्रोतस्विन्या सरय्वा प्रियसुवनितयेवादरेणानुकूलं
नित्यं गाढोपगूढः कलयतु स हितं श्रेयसा भूयसा वः ॥९८॥

मोक्षद्वारारारं वो विघटयतु पुरी द्वारवत्यद्भुतश्री-
र्यत्रत्यस्त्रीजनानां जलविहृतिविधौ दीर्घिका पश्चिमाब्धिः ।
यां नित्यब्रह्मचारी यदुकुलतिलकः षोडशस्त्रीसहस्र-
क्रीडासंतुष्टचेता नवनवविभवैः पावयामास देवः ॥ ९९ ॥

क्षेत्राणामुत्तमानामपि यदुपमया कापि लोके प्रशस्ति-
र्देहत्यागेन मुक्तिक्रयमभिलषतां यामृता पण्यवीथी ।
साक्षाद्विश्वेश्वरस्य त्रिभुवनमहिता या पुरी राजधानी
सेयं काशी सकाशीभवतु शुभकरी मुक्तये मुक्तये वः ॥१००॥

प्रायश्चित्तेष्वघानामधिकलि कठिनेष्वल्पसामर्थ्यभाजां
निर्यत्नं मानवानामघततिदलने यो लघीयानुपायः ।
दूरादालोकमात्रादपहृतसकलब्रह्महत्यो जगत्यां
कृच्छ्रात्संतारयेद्वः सपदि दुरितनिस्तारहेतुः स सेतुः ॥१०१॥

कारुण्येन स्वयं यो वृषशिखरिपतेस्तुङ्गमारुह्य शृङ्गं
क्लेशाम्भोराशिमज्जन्निखिलतनुभृतामुद्धृतौ बद्धबुद्धिः ।
प्रत्यक्षीभूय साक्षात्प्रथयति भुवि यो देवलीलाविलासा-
न्सोऽयं संत्रायतां वः परिहृतविनमत्संकटो वेङ्कटेशः ॥१०२॥

ముమ్మడి కృష్ణరాజ ఒడెయర్ 1794-1868

నృసింహభారతి జనన 1797 }

విరాధరక్ష్య 1817-79 }

1554-1626 అప్పయ్యదీక్షిత

1684-1711 Sahaji I of Tanjore

1693 Sahajiraja puram (Tiruvasaloe)

కుట్టి సుబ్రహ్మణ్యశాస్త్రి } order?

కుట్టి నరసింహశాస్త్రి

కుట్టి మాధవశాస్త్రి

కలట్టి సుబ్రహ్మణ్య

